# संस्कृतवार्ता:

दिनाङ्क :-08.12.2024 प्रात: - 06:55

इयम् आकाशवाणी

सम्प्रति वार्ताः श्रूयन्ताम्

<u>प्रधानमन्त्री</u>

प्रधानमन्त्री नरेन्द्रमोदी उक्तवान् यत् अधिक क्षयरोगजिल्हेषु केन्द्रीकृत्य विशिष्ट शतदिवसीयस्य अभियानस्य आरम्भेण क्षयरोगविरुद्धं देशस्य युद्धं सुदृढं जातम्। सामाजिक संजालीय संदेशे श्रीमोदी अवदत् यत् भारतं रोगिणां समर्थनं दुगुणं कृत्वा, जनभागीदारी, नवीनाः औषधयः, प्रौद्योगिक्याः उपयोगः, उत्तमनिदानसाधनं च कृत्वा बहुविधरूपेण क्षयरोगेण सह युद्धं कुर्वन् अस्ति। सः सर्वेभ्यः आह्वानं कृतवान् यत् ते एकत्र आगत्य क्षयरोगस्य उन्मूलनार्थं स्वस्य प्रातिभागं कुर्वन्तु।

---

<u>राष्ट्रपतिः- ओडिशा</u>

राष्ट्रपतिः द्रौपदी मुर्मु ह्यः उत्तर-ओडिशा-राज्ये केन्दुझार्-मयूर्भञ्ज्-जनपदौ योजयन्तः चतुर्नवत्यधिकद्विशतोत्तर षट्सहस्त्र कोटि-रूप्यकाणां त्रयाणां रेल्-परियोजनानां सहितं विभिन्नानां परियोजनानां शिलान्यासं विहितवती। तया जनजातीय-अनुसन्धान-विकास-केन्द्रस्य, चतुर्दशमन्दिराणां पञ्चविंशति: कोटिरूप्यकाणां शताधिक-शय्यायुक्तस्य चिकित्सालयस्य स्वगृहमण्डलस्य मयूर्भञ्ज्-नगरस्य रैरङ्गपुर्-नगरे दण्डबोस्-विमानपत्तनस्य उन्नतिकरणस्य विकास-परियोजनायाः अपि आरम्भ: अकारि। बङ्ग्रीपोसी-तः गोरुमहिसानी-पर्यन्तं, बादामपहाड्-तः केन्दूझारगढपर्यन्तं, बुडमारा-तः चाकुलिया-पर्यन्तं च नूतना: रेलमार्गाः सन्ति। नूतनाः रेल्-मार्गाः सम्पर्कं अविरतं वर्धयेयुः, आर्थिकवृद्धिं प्रोत्साहयेयुः, अस्मिन् प्रदेशे जीवनस्तरं च वर्धयेयुः इति अपेक्षा अस्ति। प्रधानमन्त्री नरेन्द्र मोदी वर्यस्य अध्यक्षतायां

आर्थिककार्य-मन्त्रिसभा-समित्या सद्यः एव रेल-परियोजनानां अनुमोदनं कृतम्। ओडिशा-राज्यस्य मुख्यमन्त्री मोहनचरणमाझी, केन्द्रीय-रेल-मन्त्री अश्विनी वैष्णव्, केन्द्रीय-जनजातीय-कार्य-मन्त्री जूयल् ओरम् इत्येते अस्मिन् शिलान्यास-समारोहे उपस्थिताः आसन्।

---------------------------------------------

गोयल - भारत - नॉर्वे::

केन्द्रीय वाणिज्य-उद्योगमन्त्री पीयूषगोयलः अद्य मुम्बईनगरे नार्वे-राजदूतस्य मे-एलिन् स्टेनरस्य नेतृत्वे नार्वे-देशस्य उद्योगप्रतिनिधिमण्डलेन सह मिलिष्यति। वाणिज्य-उद्योग-मन्त्रालयस्य वक्तव्यानुसारं व्यापार-गोलमेजइत्यस्य मुख्यं केन्द्रं भारतस्य EFTA इति यूरोपीय-मुक्तव्यापार-सङ्घस्य -देशयोः मध्ये सद्यः एव मुक्तव्यापार सन्धौ भविष्यति, यस्मिन् द्वयोः राष्ट्रयोः कृते अपारं सम्भावना विद्यते।

---------------------------------------------

सीतारामन्-प्री-बड्जेट्

वित्तमन्त्री निर्मला सीतारामन् ह्य: नवदेहली-नगरे आगामि-केन्द्रीय-आयव्ययस्य (ID1) विषये विविध-कृषक-सङ्घैः प्रमुख-कृषि-अर्थशास्त्रज्ञैः च सह द्वितीय-आयव्ययपूर्व-परामर्शस्य आध्यक्षं आवहत्। सभायां वित्तराज्यमन्त्री पङ्कज् चौधरी वित्तसचिवः डी. ऐ. पी. ए. एम्. इत्यस्य सचिवः आर्थिककार्यविभागस्य सचिवः च उपस्थिताः आसन्।

---------------------------------------------

हॉकी

हॉकी-क्रीडायां कनिष्ठ-महिला-एशिया-चषकस्पर्धा आद्यारभ्य ओमानदेशस्य मस्कटेतिनगरे समारभते। अस्यां स्पर्धायां दशदलानि प्रातिभाग्यं कुर्वन्ति। स्पर्धेयम् अग्रिमवर्षे चिलीदेशे सम्भावितस्य एफ आई एच कनिष्ठ -विश्व-चषक-स्पर्धायै पात्रता विधायिकेति अस्ति। प्रथम-ए

वर्गे भारतीयदलस्य साम्मुख्यं अद्य बांगलादेशेन सह भाविष्यति तत्रैव स्पर्धायाम् अग्रे कोरिया, जापान, चीन-ताइपे, हांगकांग, श्रीलंकेति देशैः सह भविष्यति।

-----------------------------------------

**अण्डर-१९ एशिया कप :**

अद्य दुबईनगरे पुरुषाणां अंडर-19 इति नवदश वर्षाभ्यन्तर-एशियाचषक-एकदिवसीय-क्रिकेट्-क्रीडायाः निर्णायक द्वन्द्वे भारतं बाङ्गलादेशं सम्मुखी करिष्यति। क्रीडायाः आरम्भः भारतीय समयानुसारं सार्द्धदश-वादने भविष्यति। अवधेयं वर्तते यत् बाङ्गलादेशः त्रयोविंशत्यधिक द्विसहस्रतमे वर्षे अण्डर-19 इति एशियाचषक क्रीडायाः निर्णायक द्वन्द्वे यूएई-दलं पराजय्य गतवर्षस्य विजेता अस्ति ।

।।इति वार्ता:।।